# શ્રીગોદાષ્ટોત્તરશતનામસ્તોત્રમ્

Shri Goda Ashtottarashatanamastotram

sanskritdocuments.org

December 25, 2018

# Shri Goda Ashtottarashatanamastotram

# શ્રીગોદાષ્ટોત્તરશતનામસ્તોત્રમ્

## Sanskrit Document Information

Text title : godAShTottarashatanAmastotram

File name : godAShTottarashatanAmastotram.itx

Category : devii, nadI, aShTottarashatanAma

Location : doc_devii

Transliterated by : Karthik Raman karthik.raman at gmail.com

Proofread by : Karthik Raman karthik.raman at gmail.com

Latest update : November 29, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

December 25, 2018

*sanskritdocuments.org*

# શ્રીગોદાષ્ટોત્તરશતનામસ્તોત્રમ્

ધ્યાનમ્ ।
શતમખમણિ નીલા ચારુકલ્હારહસ્તા
સ્તનભરનમિતાઙ્ગી સાન્દ્રવાત્સલ્યસિન્ધુઃ ।
અલકવિનિહિતાભિઃ સ્રગ્ભિરાકૃષ્ટનાથા
વિલસતુ હૃદિ ગોદા વિષ્ણુચિત્તાત્મજા નઃ ॥

અથ સ્તોત્રમ્ ।
શ્રીરઙ્ગનાયકી ગોદા વિષ્ણુચિત્તાત્મજા સતી ।
ગોપીવેષધરા દેવી ભૂસુતા ભોગશાલિની ॥ ૧॥

તુલસીકાનનોદ્ભૂતા શ્રીધન્વિપુરવાસિની ।
ભટ્ટનાથપ્રિયકરી શ્રીકૃષ્ણહિતભોગિની ॥ ૨॥

આમુક્તમાલ્યદા બાલા રઙ્ગનાથપ્રિયા પરા ।
વિશ્વમ્ભરા કલાલાપા યતિરાજસહોદરી ॥ ૩॥

કૃષ્ણાનુરક્તા સુભગા સુલભશ્રીઃ સલક્ષણા ।
લક્ષ્મીપ્રિયસખી શ્યામા દયાઞ્ચિતદૃગઞ્ચલા ॥ ૪॥

ફલ્ગુન્યાવિર્ભવા રમ્યા ધનુર્માસકૃતવ્રતા ।
ચમ્પકાશોક-પુન્નાગ-માલતી-વિલસત્-કચા ॥ ૫॥

આકારત્રયસમ્પન્ના નારાયણપદાશ્રિતા ।
શ્રીમદષ્ટાક્ષરીમન્ત્ર-રાજસ્થિત-મનોરથા ॥ ૬॥

મોક્ષપ્રદાનનિપુણા મનુરત્નાધિદેવતા ।
બ્રહ્મણ્યા લોકજનની લીલામાનુષરૂપિણી ॥ ૭॥

બ્રહ્મજ્ઞાનપ્રદા માયા સચ્ચિદાનન્દવિગ્રહા ।
મહાપતિવ્રતા વિષ્ણુગુણકીર્તનલોલુપા ॥ ૮॥

પ્રપન્નાર્તિહરા નિત્યા વેદસૌધવિહારિણી ।
શ્રીરઙ્ગનાથમાણિક્યમઞ્જરી મઞ્જુભાષિણી ॥ ૯॥

પદ્મપ્રિયા પદ્મહસ્તા વેદાન્તદ્વયબોધિની ।
સુપ્રસન્ના ભગવતી શ્રીજનાર્દનદીપિકા ॥ ૧૦॥

સુગન્ધવયવા ચારુરઙ્ગમઙ્ગલદીપિકા ।
ધ્વજવજ્રાઙ્કુશાબ્જાઙ્ક-મૃદુપાદ-લતાઞ્ચિતા ॥ ૧૧॥

તારકાકારનખરા પ્રવાલમૃદુલાઙ્ગુલી ।
કૂર્મોપમેય-પાદોર્ધ્વભાગા શોભનપાર્ષ્ણિકા ॥ ૧૨॥

વેદાર્થભાવતત્ત્વજ્ઞા લોકારાધ્યાઙ્ઘ્રિપઙ્કજા ।
આનન્દબુદ્બુદાકાર-સુગુલ્ફા પરમાઽણુકા ॥ ૧૩॥

તેજઃશ્રિયોજ્જ્વલધૃતપાદાઙ્ગુલિ-સુભૂષિતા ।
મીનકેતન-તૂણીર-ચારુજઙ્ઘા-વિરાજિતા ॥ ૧૪॥

કકુદ્વજ્જાનુયુગ્માઢ્યા સ્વર્ણરમ્ભાભસક્થિકા ।
વિશાલજઘના પીનસુશ્રોણી મણિમેખલા ॥ ૧૫॥

આનન્દસાગરાવર્ત-ગમ્ભીરામ્ભોજ-નાભિકા ।
ભાસ્વદ્વલિત્રિકા ચારુજગત્પૂર્ણ-મહોદરી ॥ ૧૬॥

નવવલ્લીરોમરાજી સુધાકુમ્ભાયિતસ્તની ।
કલ્પમાલાનિભભુજા ચન્દ્રખણ્ડ-નખાઞ્ચિતા ॥ ૧૭॥

સુપ્રવાશાઙ્ગુલીન્યસ્તમહારત્નાઙ્ગુલીયકા ।
નવારુણપ્રવાલાભ-પાણિદેશ-સમઞ્ચિતા ॥ ૧૮॥

કમ્બુકણ્ઠી સુચુબુકા બિમ્બોષ્ઠી કુન્દદન્તયુક્ ।
કારુણ્યરસ-નિષ્યન્દ-નેત્રદ્વય-સુશોભિતા ॥ ૧૯॥

મુક્તાશુચિસ્મિતા ચારુચામ્પેયનિભનાસિકા ।
દર્પણાકાર-વિપુલ-કપોલ-દ્વિતયાઞ્ચિતા ॥ ૨૦॥

અનન્તાર્ક-પ્રકાશોદ્યન્મણિ-તાટઙ્ક-શોભિતા ।
કોટિસૂર્યાગ્નિસઙ્કાશ-નાનાભૂષણ-ભૂષિતા ॥ ૨૧॥

સુગન્ધવદના સુભ્રૂ અર્ધચન્દ્રલલાટિકા ।
પૂર્ણચન્દ્રાનના નીલકુટિલાલકશોભિતા ॥ ૨૨॥

સૌન્દર્યસીમા વિલસત્-કસ્તૂરી-તિલકોજ્જ્વલા ।
ધગદ્ધ્ગ-ગાયમાનોદ્યન્મણિ-સીમન્ત-ભૂષણા ॥ ૨૩॥

જાજ્વલ્યમાલ-સદ્રત્ન-દિવ્યચૂડાવતંસકા ।
સૂર્યાર્ધચન્દ્ર-વિલસત્-ભૂષણાઞ્ચિત-વેણિકા ॥ ૨૪॥

અત્યર્કાનલ-તેજોધિમણિ-કઞ્ચુકધારિણી ।
સદ્રત્નાઞ્ચિતવિદ્યોત-વિદ્યુત્કુઞ્જાભ-શાટિકા ॥ ૨૫॥

નાનામણિગણાકીર્ણ-હેમાઙ્ગદસુભૂષિતા ।
કુઙ્કુમાગરુ-કસ્તૂરી-દિવ્યચન્દન-ચર્ચિતા ॥ ૨૬॥

સ્વોચિતૌજ્જ્વલ્ય-વિવિધ-વિચિત્ર-મણિ-હારિણી ।
અસઙ્ખ્યેય-સુખસ્પર્શ-સર્વાતિશય-ભૂષણા ॥ ૨૭॥

મલ્લિકા-પારિજાતાદિ દિવ્યપુષ્પ-સ્રગઞ્ચિતા ।
શ્રીરઙ્ગનિલયા પૂજ્યા દિવ્યદેશસુશોભિતા ॥ ૨૮॥

॥ ઇતિ શ્રીગોદાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Karthik Raman karthik.raman at gmail.com

*Shri Goda Ashtottarashatanamastotram*

pdf was typeset on December 25, 2018

Please send corrections to *sanskrit@cheerful.com*